International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 117-119
© 2022 IJSR
www.anantaajournal.com
Received: 10-01-2022
Accepted: 14-02-2022

डॉ० शिव कुमार मिश्रः
संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालय,
लहेरियासराय, ल० ना० मि०
विश्वविद्यालय, दरभंगा, बिहार, भारत

Corresponding Author:
डॉ० शिव कुमार मिश्रः
संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालय,
लहेरियासराय, ल० ना० मि०
विश्वविद्यालय, दरभंगा, बिहार, भारत

# महाकविकालिदासस्य काव्येषु राजधर्मनिरूपणम्

डॉ० शिव कुमार मिश्रः

## प्रस्तावना

राष्ट्रेषु भारतं भव्यं भव्यः संस्कृतवाङ्मयः।
तत्रत्या संस्कृतिर्धन्या धन्याः संस्कृत साधकाः।।
मूर्धन्यः सुरभारत्याः कालिदासो महाकविः।
कृतित्त्वयशस्य यस्य शोभते सुरभारती।। तथास्तु।

अखिल–कविकुलललामभूतस्य कविकुलगुरोः कालिदासस्य कविताकामिनी बहुजन–हिताय, बहुजन–सुखाय, सर्वलोकोपकाराय च वर्तत इति विदितचरमेव विदुषाम्। सम्प्रति राजधर्मविमुखा राजानः सततमात्मानं कलङ्कयति। प्रजाः वंचयन्तीति व्यवहारं दृष्ट्वा चेखिद्यते मनः। अतः साम्प्रतिके युगे कालिदासस्य काव्ये वर्णिताः राजधर्माः श्लाघनीयाः उपयोगिनश्च सन्ति। राजधर्म–निरूपणं कालिदासेन यादृशं कृतं स्वकीये काव्ये न तादृशमन्यत्र दृश्यते श्रूयते च। यत्तु काव्यगतं प्रयोजनं प्रतिपादयता मम्मटेनावादि–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृत्तये कान्ता सम्मिततयोपदेशयुजे।। [1]

(का० प्र०)

तत्र वयमिदं विचारयामो यद् व्यवहारज्ञानाय राजादिगतोचिताचार–ज्ञानाय वा काव्यशास्त्रस्य परमावश्यकत्वमस्तीति सर्वथा काव्यस्यानुशीलनं कर्त्तव्यमेवेति प्रतिपादितम् भवति। अतश्चावश्यकं प्रतिभाति यत् काव्यशास्त्राध्ययनं विना कृतश्रमाः अपि विद्वांसः समाजे समादरं नैव लभन्ते। किं बहुना काव्यशास्त्रापरिशीलनाल्लौकिकाचार–विचारव्यवहार–विज्ञान–विधुराः सन्तः राजनेतारः समाजे हास्यतां व्रजन्ति। अतः ते संसारयात्रा–निर्वाहाय राजधर्मपरिपालनाय च कालिदासीयां शिक्षामासादयेयुरितिमे मतिः। कालिदासस्य काव्ये सर्वत्र प्रतिपदं राजधर्मः प्रतिपादितः। इदं प्रतिभाति यद् धर्महीना राजनीतिः वेश्येव विगर्हिता हेया च भवति। अतः कालिदासेन धर्मानुमोदिता राजनीतिः स्वीकृता, अभिज्ञानशाकुन्तलस्य पंचमाङ्के कंचुकिनः उक्तिद्वारा–

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोध–गृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थान–विक्लव–गतेरवलम्बनार्था।। [2] इति।

उपर्युक्त–पद्ये कविनाऽऽचारस्य चर्चा कृता। तत्र को नामाचारः इति प्रश्ने आचारो नियमः सत्सम्प्रदायो धर्मश्च निरूपितो भवति। स च सर्वथा पालनीयां ग्राह्यश्चेति विद्या कथमपि राज्ञा न हेयः। ''आचारहीनं न पुनन्ति वेदाः'' ''आचारः परमो धर्मः'' इत्यादयो बहवो नियमाः राजानं प्रतिबोधयन्ति धर्मानुष्ठानाय। राजधर्ममनादृत्य राजानः कथमपि लोकान् रंजयितुं नैव प्रभवन्ति। तथैव कंचुकी प्रतिपादपति यद् ''भोः कामं धर्मकार्यमनतिपात्यं देवस्य, तथाऽपीदानीमेव धर्मासनादुत्थिताय पुनरूपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा ''अविश्रमोऽयं लोकतन्त्राधिकारः''। उपर्युक्त–विवेचनया स्पष्टं प्रतिभाति यदिह लोकतन्त्रो वर्णाश्रम–लक्षितस्य प्रजाजनस्य योगक्षेमाय सर्वदैव राज्ञा भाव्यमिति। प्रथितमिदं यल्लोकतन्त्रो लोकाधीनः तन्त्राधिकारः प्रधानाधिकारो भवति।

न हि स्वतन्त्रेण मनसा राज्ञा किमपि कर्त्तुं शक्यते किन्तु प्रजापालनाधिकारः प्रजानुरोधनैव सम्पादयितुं शक्यते। किं बहुना प्रजापालन–तत्परेण राज्ञा कथमपि विश्रमो नाश्रयणीय इति राजधर्मः। उक्तं हि तत्रैव–

भानुः सकृद् युक्त–तुरंग एव
रत्रिान्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहित– भूमिभारः
षष्ठांश–वृत्तेरपि धर्म एषः।। [3]

अत्र पद्ये विश्राामानपेक्षस्य सार्वकालिक–प्रवृत्यात्मकस्य राजधर्मस्य वाक्यचतुष्टयेन प्रतिपादनं कविना कृतम्। विचारयन्तु सुधियो यद् भगवान् भास्करः सकृदेव रथे तुरङ्कमान् संयोज्य अविरतं पर्यटति। यतो हि कालात्मा भगवान् भास्करः क्षणमपि विश्रान्त्यपेक्षया यदि विलम्बते तर्हि कालगतिः कुण्ठिता स्यात् अव्यवस्था च भवेत् जगत्–प्राणो मारूतः अहोरात्रामविरतं प्रयाति यदि क्षणमपि तिष्ठेत्तर्हि विनश्येयुरिमाः प्रजाः। एवमेव शेषोऽपि पृथ्वीमकम्पेन शिरसा धारयति। इत्थंचोर्ध्वलोकस्थौ सूर्यबायू, अधोलोकस्थो भगवाननन्तश्च यथा समुज्झित–निज–सुखाः सर्वदा परार्थमेव प्रयतन्ते तथैव साम्प्रतिकैः राजनेतृभि–र्भाव्यमिति कालिदासस्याभिप्रायः। तथा च प्रजा–षष्ठांशभुजां राज्ञामपि स्वसुखमनपेक्ष्य सर्वथा प्रजापरिपालनं धर्म इति विज्ञेयः। धर्मासनस्थो हि राजा स्वापत्यनिर्विशेषं प्रजाजनान् परिपाल्य तान् स्वे स्वे कर्मणि नियोजयन् तेषां विवादांश्च शमयन् तान्निरूप–सर्गान् विधाय धन्यमात्मानं मन्यते। उक्तं हि–

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवतेऽशान्तमना विविक्तम्।
यूथानि संचार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः।। [4]

(शा०,5,5)

राज्ञः धर्मो विद्यते यत् स सर्वदेवात्मनः सुखादिसाधनमनपेक्षमाणः प्रजाजनस्य सुखसम्पादनार्थमविरतं प्रयासं कुर्यादिति। आत्मसुख–निरपेक्षा प्रजाजनसुख–सम्पादन–प्रयत्नात्मिका प्रवृत्तिः राज्ञः भवेदिति विवेचनेन प्रतिभाति। सा च नैव सम्प्रति श्रूयते अनुभूयते वा। जनानां राज्ञां वा का चर्चा स्थावरादयोऽपि मूर्ध्ना मध्यन्दिन–देदीप्यमान–प्रचण्ड–मार्तण्ड–प्रखरांशुजालं सर्वदा सहमानाः स्वतलोपविष्टानां पथिकानां छायादानेनातपसन्तापं दूरीकुर्वन्ति। उक्तं हि तेनैव–

स्वसुख–निरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवं–विधैव।
अनुभवति हि मूर्ध्वा पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्।। [5]

एवमेव राजधर्म–निरूपणप्रसंगं सविस्तरं वर्णयता तेन प्रतिपादितं यत् विमार्गप्रस्थिताः जनाः सत्पथे स्थापनीयाः, दण्डेन दुर्वृत्ताः नियमनीयाः। यदुक्तं मनुना–

तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम्,
ब्रह्म तेजोमयं दण्डमसृजत् परमेश्वरः।
स्वराष्ट्रे न्याय–वृत्तिः स्यादग्रदण्डश्च शत्रुषु
सुहृत्स्वजिह्यः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः।। [6]

तथा च राज्ञः प्रथमं कर्त्तव्यं भवति यद् वैभवेन प्रजासु सर्वविध–सम्पत्ति–पोषणं कुर्यात्। कलह–शमनात् सुहृद्रक्षणात् पुत्रवत् प्रजा–परिपालनाद्राजा भवति। तथाहि–

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।
अर्तनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्।। [7]

यथा जल फलागमैर्धना वृक्षाश्च नम्राः भवन्ति तथैव परार्थघटकानां सत्–पुरूषेषु परोपकारिषु च नभ्रत्वेन स्वभावत एव भवितव्यम्। उद्धता राजानः नैव प्रजापरिपालनाय समर्था इति सूचितम्। यस्य राज्ञः शासने निर्विघ्न–तपसो मुनयः धर्मक्रियासु प्रवर्तन्ते स राजा अभ्यर्थनीयो भवति। यथा तत्रैव प्रतिपादितम्–

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।
तमस्तपति धर्मांशौ कथमाविर्भविष्यति।। [8]
रघुवंशेऽपि कविना एवमेव सविस्तरं प्रतिपादितम्–

एतेन वर्णनेनेदं प्रतिभाति यत् प्रतापोपेतो राजा एव वर्णाश्रमक्रिया–प्रवर्तको भवति। राजति, दीप्यते, रंजयति वा, इति व्युत्पत्त्या राजशब्दो निष्पद्यते। उक्तं हि तत्रैव ''अर्थवान् खलुमे राजशब्दः'' इति। कालिदासस्य काव्ये राजधर्मस्य परिपालनं सर्वत्र दृग्गोचरीभवति। ऋष्यागमनावसरे ''कुशली कण्व'' इति वचसा मनुना प्रतिपादितं राजधर्ममेवानुसरति कविः। उक्तं हि मनुना–

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च।। [9]

यः खलु राजा आत्मनः स्खलितमपि न जानाति स कथं प्रकृतिषु को जनः केन पथा प्रचरतीति वेत्स्यति? तथा चात्मसम्बन्ध–विषयेऽपि सम्यगनुशीलनं कर्त्तव्यमिति राजधर्मः स्वयमसिद्धः परान् कथं साधयेत् इति धिया स्वयमनभिज्ञः कथं ब्रूयाद् यन्न प्रजासु मे पापः कोऽवि विद्यते। एतावतात्मशुद्धिः सर्वथा समपेक्षिता विद्यते। न हि पापात्मा राजा कथमपि लोककल्याणाय प्रमवति। उक्तं हि–

अहन्यहन्यात्मन एव ताव
ज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयाती
त्यशेषतः को नु विदाङ्करोतु।। [10]

आर्त्तत्राणमपि राज्ञः प्रथमं कर्त्तव्यमिति ज्ञात्वा प्रजासु भयं न स्यादित्यर्थं सर्वतोभावेन तेन यतनीयमिति। उक्तं हि तत्रैव–

आर्त्तानां भयमपनेतुमात्तधन्वा,
दुष्यन्तस्तव शरणं भवत्विदानीम्।। [11]
(शा०,6.27)

राजधर्म–निरूपणावसरे भरतवाक्येऽपि साटोपं प्रकृतिहितादयो धर्माः निरूपिताः। ''पृथिवी–पतिः प्रकृति–हिताय प्रवर्तताम्'' इत्यनेनेदं सूचितम् यत् सप्तांगी प्रकृतिर्भवति तस्यायमभिप्रायो यन्न त्वात्मतुष्टये किन्तु पौर–श्रेणी–हिताय सर्वथा यतनीयमिति। प्रकृतिशब्देन स्वाम्यादिराख्याङ्गानि कथ्यन्ते। ''राज्याङ्गानि प्रकृतयः इत्यमरः।''। यज्ञावल्क्येनापि प्रतिपादितम्–

स्वामी जनपदोऽमात्यः कोशो दुर्गबल सृहृत्।
राज्यं सप्तप्रकृत्यङ्गं नीतिज्ञाः सम्प्रचक्षते।।

इत्थं च सप्ताङ्गप्रकृति–युक्तो राजा लोकविलक्षणो भवति। अतो राज्ञा बुद्ध्यादिसम्पन्नेन प्रकृत्यादि–युक्तेन च भवितव्यमिति। एवम्भूतो राजाऽप्रमत्तां भवति। अन्यथा राज्ञः स्वरूप–हानिरपि भवितुमर्हतीति ध्येयम्। माघेनापि शिशुपालवधमहाकाव्ये स्वकीयं तात्पर्यमत्रैव रक्षितम्।

शिव कुमारमिश्रेण निरूपितं यथामति।
संस्कृतस्य प्रचारार्थं राष्ट्रकल्याण वांछया।।[12]
!!इति शम्!!

**संदर्भग्रंथ सूची**


1. काव्य प्रकाशे।
2. अभिज्ञान शाकुन्तले–5–3।
3. अभिज्ञान शाकुन्तले–5–4।
4. अभिज्ञान शाकुन्तले–5–5।
5. अभिज्ञान शाकुन्तले–5–7।
6. मनुस्मृतौ–7.4.32।
7. अभिज्ञान शाकुन्तले–5–8।
8. अभिज्ञान शाकुन्तले–5–14।
9. मनुस्मृतौ–1.27।
10. अभिज्ञान शाकुन्तले–6–26।
11. अभिज्ञान शाकुन्तले–6–27।
12. याज्ञवल्क्य स्मृतौ–3–53।